# PT4/ANNUAL EXAMINATION, 2023-24

## SANSKRIT

**Time – 3 hrs.** **Class – VIII** **M.M. – 80**

Name of the student ______________________ Section ____ Date - 08.02.2024 (Thursday)

**निर्देशाः -**

- सर्वप्रश्नाः अनिवार्याः सन्ति।
- प्रश्नानाम् उत्तराणि खण्डक्रमानुसारेणैव देयानि।
- उत्तराणि संस्कृतेनैव लेखनीयानि।

### खण्डः - क (अपठितावबोधनम् 10 अङ्काः)

**प्र.1 अधोलिखितगद्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत-**

सूर्यः तु अस्तं गच्छति | अधुना सायंकालः भवति | खगाः स्वनीडानि गच्छन्ति | कमलानि म्लनानि भवन्ति कुमुदानि च विकसन्ति | आश्रमेषु तपसा अनले यजन्ति | कृषकाः विश्रामम् आचरन्ति | उलूकाः इतः ततः भ्रमन्ति | मन्दिरेषु शंखानां शब्दः भवति | पथिकाः विश्रामाय तिष्ठन्ति | पाचकाः भोजनं पचन्ति | बालकाः क्रीडाक्षेत्रात् स्व-गृहम् आगच्छन्ति | ते गृहम् आगत्य विविधान् आहारन् खादन्ति | जनाः तु गृहेषु चायपानं कुर्वन्ति | केचन जना: सायंकाले दूरदर्शनं पश्यन्ति | बालकाः दुग्धं पिबन्ति | ततः ते पाठान् पठन्ति लिखन्ति च | सायंकाले तु सर्वत्र अन्धकारस्य राज्यम् एव भवति |

**(I) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **(2)**

क) खगा: कुत्र गच्छन्ति ?

ख) तापसाः कुत्र यजन्ति ?

ग) जनाः गृहेषु किं पिबन्ति ?

**(II) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)** **(4)**

क) सायंकाले कानि म्लानानि भवन्ति कानि च विकसन्ति ?

ख) जनाः सायंकाले किं कुर्वन्ति ?

ग) दुग्धं के पिबन्ति ?

**(III) गद्यांशस्य समुचितं शीर्षकम् एकं लिखत |** **(1)**

**(IV) यथानिर्देशम् उत्तरत । (केवलं प्रश्नत्रयम्)** **(3)**

क) "खाद्यान्नान्" इत्यस्मै अनुच्छेदे किं पदं प्रयुक्तम् ?

(अ) विविधान् (ब) आहारान् (स) चायपानम् (ग) दुग्धम्

ख) "आगत्य" इति पदे उपसर्ग-प्रकृतिप्रत्ययविभागं कुरुत |

(अ) आ + गम् + ल्यप् (ब) आ + गच्छ + अनीयर्

(स) आग + ति + अनीयर् (ग) आ + गम् + अनीयर्

ग) "शंखानाम्" इति पदे का विभक्तिः ?

(अ) द्वितीया (ब) पञ्चमी (स) सप्तमी (ग) षष्ठी

घ) "सायंकाले तु सर्वत्र अन्धकारस्य राज्यम् एव भवति |" इत्यस्मिन् वाक्ये कति अव्ययाः सन्ति ?

(अ) द्वि (ब) त्रि (स) चतुर् (ग) न कोऽपि

## खण्डः - ख (रचनात्मककार्यम् - 25 अङ्काः)

**प्र.2 स्वविद्यालये आयोजितं रक्तदानशिविरे रक्तदानस्य विषये स्वपितरं प्रति पत्रं पूरयत ।** **(1/2x10=5)**

ओ. पी. जिन्दल छात्रावासः

रायगढनगरम्

तिथिः 08.02.2024

पूज्य पितृमहोदय,

चरणवन्दना ।

अहम् अत्र कुशलः अस्मि। अहं भवन्तं सविनयं निवेदयामि यत् (1)...............विद्यालये ह्यः रक्तदानशिविरम् आयोजितम् । अस्माकं (2) .............. महोदयः अत्र मुख्यातिथिः आसीत् । सर्वप्रथमं सः एव (3)............. अकरोत् । तदा (4).............. कृत्वा सर्वे अध्यापकाः रक्तदानं अकुर्वन् । सर्वे (5).................अपि एतस्मिन् (6)................ अग्रे आसन् । मम (7)..............अपि रक्तदानस्य भावना (8).............अभवत् । अहं स्वमित्रेण सह (9) ......................अयच्छम् | आशासे यत् भवान् मम भावनां (10)................प्रसन्नः भविष्यति ।

| |
|---|
| उत्पन्ना; ज्ञात्वा, मनसि, शुभकार्ये, निदेशकः, रक्तदानं, एकैकम्, छात्राः, अस्माकम्, स्वरक्तम् |

**प्र.3 अधोलिखितम् संवादम् मंजूषायाः पदानां सहायतया पूरयत-** **(5)**

| |
|---|
| शाटिका, मिष्टान्नानि, दीपान्, अहम्, वस्त्राणि |

राकेशः - हे अम्बे ! अद्य त्वम् (1)................. प्रज्वालयसि | अहम् जाने अद्य तु दीपावली इति अस्ति ?


सावित्री - पुत्र ! सत्यम् कथयसि | अधुना आगच्छ प्रदर्शय स्व नवीनानि (2).................| एतानि तु शोभन्ते |

राकेशः - तव नवीना (3) ............................. मह्यम् अपि रोचते | परम् (4) ................... तु मिष्टान्नानि वाञ्छामि |

सावित्री - रात्रौ यदा वयम् लक्ष्मीगणेशौ पूजयिष्यामः तदा वयम् (5)..................... अपि खादामः | इदानीम् मिष्टान्नानि वितरणाय गच्छावः |

**प्र.4 अधोप्रदत्तं चित्रं दृष्ट्वा मञ्जूषायाः पदानां सहायतया पञ्च संस्कृत वाक्येषु वर्णयत-** **(10)**

| |
|---|
| एतत् चित्रम्, एकम् , गृहम्, उद्यानस्य , आम्रम्, पादपाः, वृक्षाः, त्रोटयति, बालकाः, पुष्पाणि, मालाकारः, विकसन्ति |



**प्र.5. अधोलिखितानां हिन्दीवाक्यानां संस्कृतानुवादं कुरुत | (केवलं प्रश्नपंचकम्) (1x5=5)**

1) वे दोनों विद्यालय जा रहे हैं।
2) माता भोजन पका रही है।
3) तुम पुस्तक पढ़ते हो ।
4) बालक वृक्ष से गिरता है ।
5) तालाब में कमल खिलते हैं ।
6) मैं ध्यान से पढ़ता हूँ।

## खण्ड: - ग (अनुप्रयुक्तव्याकरणम् - 15 अङ्का:)

**प्र.6 निर्देशानुसारं विकल्पेभ्यः उचितं शब्दरूपं चित्वा लिखत - (1x5=5)**

(क) 'अस्मद्' शब्दस्य **प्रथमा बहुवचने** किम् रूपं भविष्यति ?

(अ) मया (ब) अहम् (स) वयम् (द) मम

(ख) 'तत्' शब्दस्यपुल्लिङ्गे **प्रथमा-बहुवचने** किम् रूपं भविष्यति ?

(अ) तेन (ब) ते (स) तैः (द) तानि

(ग) 'मुनि' शब्दस्य **प्रथमा-बहुवचने** किम् रूपं भविष्यति?

(अ) मुनिः (ब) मुनयः (स) मुनी (द) मुनना

(घ) 'साधु' शब्दस्य **द्वितीया बहुवचने** किम् रूपं भविष्यति?

(अ) साधवः (ब) साधूनाम् (स) साधून् (द) साधुम्

(ङ) 'युष्मद्' शब्दस्य **तृतीया-एकवचने** किम् रूपं भविष्यति ?

(अ) त्वम् (ब) यूयम् (स) त्वया (द) त्वत्

**प्र.7 निर्देशानुसारं विकल्पेभ्यः उचितं धातुरूपं चित्वा लिखत - (1x5=5)**

(क) नम् धातोः लोट् लकारे **उत्तमपुरुष-एकवचने** किम् रूपं भविष्यति?

(अ) नमतु (ब) नमानि (स) नमेत् (द) नमथ

(ख) खाद् धातोः विधिलिङ्-लकारे **प्रथमपुरुष-बहुवचने** किम् रूपं भविष्यति?

(अ) खादेत (ब) खादतु (स) खादेयु: (द) खादथः

(ग) पठ् धातोः लट्लकारस्य **उत्तमपुरुष-बहुवचने** किं रूपं भविष्यति?

(अ) पठाम: (ब) पठामि (स) पठत: (द) पठन्ति

(घ) गम् धातोः लृट्लकारस्य **मध्यमपुरुष-एकवचने** किं रूपं भविष्यति?

(अ) गमिष्यति (ब) गमिष्यसि (स) गमिष्यन्ति (द) गमिष्यामि

(ङ) चल् धातोः लङ्लकारस्य **प्रथमपुरुष-एकवचने** किं रूपं भविष्यति?

(अ) अचल: (ब) अचलत् (स) अचलाव (द) चलति

**प्र.8 मञ्जूषाप्रदत्तरिक्तैः अव्ययपदैः अधोलिखित-अनुच्छेदे रिक्तस्थानानि पूरयत- (1x5=5)**

| एव, सर्वत्र, च, तत्र, यत्र |
|---|

क) हितं मनोहारि (1)................ दुर्लभं वचः |

ख) (2)................ नार्यः तु पूज्यन्ते रमन्ते (3)................ देवता |

ग) विद्यावान् (4)................ पूज्यते |

घ) सत्यम् (5)................ मृगेन्द्रता |

## खण्डः - घ (पठितावबोधनम् - 30 अङ्काः)

**प्र.9 अधोलिखितम् गद्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

पूर्वदिशायाम् उदेति सूर्यः पश्चिम दिशायां च अस्तं गच्छति इति दृश्यते हि लोके। अनेन अवबोध्यमस्ति यत्सूर्यो गतिशीलः इति । सूर्योऽचलः पृथिवी च चला या स्वकीये अक्षे घूर्णति इति साम्प्रतं सुस्थापितः सिद्धान्तः। सिद्धान्तोऽयं प्राथम्येन येन प्रवर्तितः स आसीत् महान् गणितज्ञः ज्योतिर्विच्च आर्यभटः। पृथिवी स्थिरा वर्तते इति परम्परया प्रचलिता रूढिः तेन प्रत्यादिष्टा ।

**क) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **(1x2=2)**

अ) सूर्य कस्यां दिशायाम् उदेति ?

ब) कः अचलः अस्ति ?

स) महान् गणितज्ञः ज्योतिर्विद् च कः आसीत् ?

**ख) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नैकम्)** **(1x1=1)**

अ) का प्रचलिता रूढिः आर्यभटेन प्रत्यादिष्टा ?

ब) कः सिद्धान्तः सर्वप्रथमम् तेन प्रवर्तितः ?

**ग) भाषिक कार्यम् - (केवलं प्रश्नद्वयम्)** **(1x2=2)**

अ) 'पृथिवी स्थिरा वर्तते' इति वाक्ये 'वर्तते' क्रियापदस्य कर्तृपदं किम् अस्ति ?

ब) 'प्रत्यादिष्टा' इति पदस्य संधिः विच्छेदः क्रियताम् ?

स) 'सूर्योऽचलः' अत्र विशेषण पदम् किम् अस्ति ?

**प्र.10 अधोलिखितं पद्यांशम् पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिवेत् |
सत्यपूतां वदेद्वाचं मनः पूतं समाचरेत् ||

**क) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्)** **(1x2=2)**

अ) कीदृशं जलं पिबेत् ?

ब) कीदृशीं वाचं वदेत् ?

स) वस्त्रपूतम् किं पिबेत् ?

**ख) पूर्णवाक्येन उत्तरत- (केवलं प्रश्नैकम्)** **(1x1=1)**

अ) कीदृशं कर्मं समाचरेत् ?

ब) कीदृशं पादं न्यसेत्?

**ग) भाषिक कार्यम् - (केवलं प्रश्नद्वयम्)** **(1x2=2)**

अ) 'वस्त्रपूतं जलं पिबेत् |' अत्र क्रियापदं किम् ?

ब) 'पवित्रम्' इत्यस्य पर्यायपदम् अत्र किं प्रयुक्तम् ?

स) 'वस्त्रपूतं जलं' अत्र विशेषणं पदं किम् ?

**प्र.11 - रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नपंचकम्)** **(1x5=5)**

क) सप्तभगिनी - प्रदेशे **वंशोद्योगः** सर्वप्रमुखः ।

ख) **सर्वकारस्य** घोषणा अस्ति ।

ग) अहं **कुलिशात्** कठिना भारतजनताऽस्मि ।

घ) **प्रसन्नतायाः** विषयोऽयम् |

ङ) **तयोः** नित्यं प्रियं कुर्यात्।

च) प्रदेशेऽस्मिन् **हस्तशिल्पानां** बाहुल्यं वर्तते।

**प्र.12 समानार्थकपदानि योजयत -** **(1x5=5)**

वसुन्धराम् - नदी

कुलिशात् - पृथ्वीम्

प्रकृतिः - वज्रात्

चक्षुषा - स्वभावः

तटिनी - नेत्रेण

**प्र.13 - विलोमपदानि योजयत -** **(1x5=5)**

उदयः - प्रकाशः

अचलः - अस्तः

अन्धकारः - अस्थिरः

स्थिरः - निरादरः

समादरः - चलः

**प्र.14 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत -** **(1x5=5)**

| नौकाम्, पृथिवी, परिश्रमम्, तदा, यादृशम्, पितृगृहम् |
|---|

(क) ................ कर्म करिष्यसि । तादृशं फलं प्राप्स्यसि ।

(ख) ................ विना विद्या न लभ्यते।

(ग) शालिनी ग्रीष्मावकाशे ................ आगच्छति ।

(घ) यदा पृथिव्याः छायापातेन चन्द्रस्य प्रकाशः अवरुध्यते ................ चन्द्रग्रहणं भवति ।

(ङ) नौकायाम् उपविष्टः मानवः ................ स्थिरामनुभवति ।